(1100) " बर्ह प्राधान्ये " (I-भ्वादिः-638. सक. सेट्. आत्म.)
बर्हकः-र्हिका, बर्हकः-र्हिका, बिबर्हिषकः-षिका, बाबर्हकः-र्हिका ; इत्यादीनि सर्वाण्यपि रूपाणि भौवादिकगर्हतिवत् (385) ज्ञेयानि । [1]बर्हः, [2]बर्हिणः, [3]बर्हकः इमानि रूपाण्यधिकान्यत्रेति विशेषः ।

(1101) " बर्ह हिंसायाम् " (X-चुरादिः-1665. सक. सेट्. उभ.)
बर्हकः-र्हिका, बिबर्हयिषकः-षिका, बर्हयिता-त्री, बिबर्हयिषिता-त्री ; इत्यादीनि सर्वाणि रूपाणि चौरादिकगर्जयतिवत् (378) बोध्यानि । क्विपि [4]बर्ट्-बर्ड्-बर्हौ-बर्हः ; [A]अनिबर्हणीयम् ।

(1102) " बर्ह भाषार्थः " (X-चुरादिः-1770. सक. सेट्. उभ.)
आस्वदीयः ।

'वृद्धौ भाषार्थविषये बृंहयेद् बर्हयेदिति ॥' (श्लो. 198) इति देवः ।
बर्हकः-र्हिका, बिबर्हयिषकः-षिका, बर्हयिता-त्री, बिबर्हयिषिता-त्री ; इत्यादीनि सर्वाणि रूपाणि चौरादिकग्रासयतिवत् (439) बोध्यानि ।

(1103) " बल प्राणने धान्यावरोधने च "
(I-भ्वादिः-840. सक. सेट्. पर.) ज्वलादिः ।

प्राणनम्=जीवनम् । धान्यावरोधनम्=कुसूलादिव्यापारः । प्राणनेऽकर्मकः, धान्यावरोधने सकर्मकः ।
बालकः-लिका, बालकः-लिका, बिबलिषकः-षिका, बाबलकः-लिका ;

---

1. बर्हते=प्राधान्येन सर्वेष्ववयवेषु वर्तते इति बर्हः=मयूरादीनां शिखण्डकः । पचाद्यचि रूपमेवम् ।
2. 'फलबर्हाभ्यामिनच् वक्तव्यः' (वा. 5-2-122) इति मत्वर्थीय इनच्प्रत्ययः । बर्हिणः=मयूरः ।
3. आशिषि गम्यमानायाम् 'आशिषि च' (3-1-150) इति वुन् । बर्हताम् इत्याशिषि गम्यमानायामयं प्रत्ययो भवतीति ज्ञेयम् ।
4. 'रात् सस्य' (8-2-24) इति नियमात् हकारस्य संयोगान्तलोपो न । हकारस्य पदान्तनिमित्तके ढत्वे, चर्त्वविकल्पे च रूपमेवम् ।
A. 'अम्लेच्छलोकसहिते सदसीह तस्मात्
को ब्रूसयिष्यति शिव्रतनिबर्हणीयम् ॥' धा. का. 3. 30.